योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः २०

विंशः सर्गः २०

श्रीवसिष्ठ उवाच ।

एतत्ते कथितं सर्वं मनोरूपनिरूपणम् ।

मया राघव नान्येन केनचिन्नाम हेतुना ।। १

दृढनिश्चयवच्चेतो यद्भावयति भूरिशः ।

तत्तां यात्यनलाश्लेषादयःपिण्डोऽग्नितामिव ।। २

भावाभावग्रहोत्सर्गदृशश्चेतनकल्पिताः ।

नासत्या नापि सत्यास्ता मनश्चापलकारिताः ।। ३

मनो मोहे तु कर्तृ स्यात्कारणं च जगत्स्थितेः ।

विश्वरूपतयैवेदं तनोति मलिनं मनः ।। ४

मनो हि पुरुषो नाम तं नियोज्य शुभे पथि ।

तज्जयैकान्तसाध्या हि सर्वा जगति भूतयः ।। ५

पुरुषश्चेच्छरीरं स्यात्कथं शुक्रो महामतिः ।

अगमद्विविधाकारं जन्मान्तरशतभ्रमम् ।। ६

अतश्चित्तं हि पुरुषः शरीरं चेत्यमेव हि ।

यन्मयं च भवत्येतत्तदवाप्नोत्यसंशयम् ।। ७

यदतुच्छमनायासमनुपाधि गतभ्रमम् ।

यत्नात्तदनुसंधानं कुरु तत्तामवाप्स्यसि ।। ८

अभिपतति मनःस्थितं शरीरं

नतु वपुराचरितं मनः प्रयाति ।

अभिपततु तवात्र तेन सत्यं

सुभग मनः प्रजहात्वसत्यमन्यत् ।। ९

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षोपाये स्थितिप्रकरणे मनोरूपवर्णनं नाम विंशतितमः सर्गः ।। २० ।।